**दिनाङ्क :- 16.09.2024**

**प्रात: - 06:55**

**अथ वार्ता**

**प्रधानमन्त्री अहमदाबाद**

प्रधानमन्त्री नरेन्द्रमोदी ह्यः सायं गुजरातस्य अहमदाबादं सम्प्राप्तवान्। अद्य श्रीमोदी प्रधानमन्त्री सूर्यगृह निःशुल्क-विद्युद्-योजनायाः लाभार्थिभिः सह संवादं करिष्यति तथा च गांधीनगरस्य महात्मामन्दिरे नवीकरणीय ऊर्जासम्मेलनस्य चतुर्थसंस्करणस्य उद्घाटनं करिष्यति। अद्य सायंकाले श्रीमोदी अहमदाबादनगरे अष्टसहस्रकोटितोप्यधिकमूल्यानां बहुविकासपरियोजनानां उद्घाटनं कृत्वा आधारशिलां च स्थापयिष्यति। सहैव प्रधानमन्त्री अहमदाबाद गांधीनगरयोः मेट्रोरेलयानविस्तारस्य द्वितीयचरणम् अपि ध्वजं प्रदर्शयिष्यति।

**ट्रम्प/भुसुण्डी**

गतरात्रौ वेस्ट् पाम्बीच्, फ्लोरिडा-नगरस्य ट्रम्प-नेशनल्-गोल्फ्-क्लब् इत्यत्र तस्य समीपे भुशुण्डी-प्रहारस्य सूचना प्राप्तेः अनन्तरं पूर्वअमेरिकीराष्ट्रपतिः डोनाल्डट्रम्पः सुरक्षितः इति सः उक्तवान्। ट्रम्पस्य अभियानसञ्चारनिदेशकेन स्टीवन् चेऊंग इत्यनेन उक्तं यत् यदा भुशुण्डी प्रहारस्य ध्वनिः श्रुता तदा ट्रम्प: गोल्फक्रीडाङ्गणे एव आसीत्।

**नाइजीरिया/नौका-दुर्घटना**

नाइजीरियादेशे ह्यः देशस्य उत्तर-पश्चिमीय-भागे नौकादुर्घटनायां न्यूनातिन्यूनं एकचत्वारिंशत जनाः मृत्युमुपगताः। द्वादश जनाः उद्धारिताः। जाम्फारा-राज्यस्य गुम्मी-नगरस्य समीपे एकस्यां नद्यां पञ्चाशत् यात्रिभिः चालकदलैः च सह वहन्ति काष्ठनौका जलमग्ना-भवत्।

**ईद-मिलाद-उन-नबी**

ईद-मिलाद-उन-नबी अद्य देशस्य विभिन्न भागेषु धार्मिक भावनया सह मान्यते। पैगम्बर मुहम्मदस्य जन्मदिवसः मिलाद-उन्-नबी इति नाम्ना आचर्यते। राष्ट्रपतिः दौपद्री-मुर्मू-वर्या जनेभ्यः ईद मिलाद-उन-नबी-पर्वणः शुभकामनाः दत्तवती । राष्ट्रपतिः मुर्मूवर्या एकस्मिन् संदेशे प्रोक्तवती यत् पैगम्बर मोहम्मदः विश्वं प्रेम्णः शान्तेः च संदेशम् प्रायच्छत् । तस्य शिक्षाः अस्मान् भातृभावनया परस्परमेलनेन च सह जीवनं यापितुं प्रेरयन्ति ।

**पश्चिमबङ्ग आरजी कर चिकित्सा**

पश्चिमबङ्गे आरजी-कर-चिकित्सा-महाविद्यालयस्य चिकित्सालयस्य च पूर्वप्राचार्यः संदीपघोषः, तालाआरक्षीस्थानकस्य पूर्वप्रभारी अधिकारी अभिजीतमण्डलः च त्रयाणां दिवसानां सीबीआई-निग्रहे प्रेषितौ। रविवासरे सीयालदाह-न्यायालये तयोः प्रस्तुतीकरणं अभवताम्। अवधेयं वर्तते यत् सीबीआई-संस्थया शनिवासरे रात्रौ आरजी कर-दुष्कर्म-हत्या-प्रकरणे उभौ अभियुक्तौ गृहीतौ।

**जम्मू-कश्मीरे विधानसभा**

जम्मू-कश्मीरे प्रथमचरणीय विधानसभानिर्वाचनस्य प्रचारः द्रुतागत्या प्रचलति। अस्मिन् चरणे अस्य मासस्य अष्टादश-दिनाङ्के चतुर्विंशतिः विधानसभाक्षेत्राणां कृते निर्वाचनं भविष्यति। भाजपायाः वरिष्ठः नेता तथाच केन्द्रीयगृहमन्त्री अमितशाहः अद्य चेनाब-उपत्यकायां रामबन-किश्तवार्-पद्दर-क्षेत्रेषु त्रीणि जनसभाः सम्बोधयिष्यति । जम्मू मण्डलस्य चेनाब उपत्यकायाः अष्टविधानसभाक्षेत्रेषु प्रथमचरणे निर्वाचनं भविष्यति ।

**बैडमिण्टन्**

बैडमिण्टन्-क्रीडायां भारतस्य क्रीडिका अनमोल् खरबः बेल्जियमदेशस्य लूवेन्-नगरे चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य बेल्जियम-अन्तर्राष्ट्रीय-क्रीडायां महिला-एकल-स्पर्धायां विजयं प्राप्य प्रथमं निज-वरिष्ठ-अन्तर्राष्ट्रीय-उपाधिं सुरक्षितवती।

**हॉकी एशियाई चैम्पियनशिपः**

हॉकी एशियाई चैम्पियनशिपः अद्य चीनदेशस्य हुलुन्बुइर्-नगरे चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य एशिया-चैम्पियन्स्-चषक प्रतिस्पर्धायाः उपान्त्यचक्रीय-क्रीडायां भारतं दक्षिणकोरिया-दलं सम्मुखीकरिष्यति । क्रीडायाः प्रसारणं भारतीय समयानुसारं सार्ध त्रि वादने भविष्यति।